# Svarnakarshanabhairava Stotram

# સ્વર્ણાકર્ષણભૈરવસ્તોત્રમ્

## Document Information

Text title : Svarnakarshanabhairava Stotram 2

File name : svarNAkarShaNabhairavastotram2.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 27, 2025

*sanskritdocuments.org*

# સ્વર્ણાકર્ષણભૈરવસ્તોત્રમ્

કલ્પાન્તે શમિતત્રિવિક્રમમહાકઙ્કાલબદ્ધસ્ફુરત્
 શેષસ્યૂતનૃસિંહપાણિનખર પ્રોતાદિ કોલામિષઃ ।
વિશ્વૈકાર્ણવતાવિહારમુદિતૌ યૌ મત્સ્યકૂર્માવુભૌ
 કર્ષન્ધીવરતાં ગતોઽસ્યતુ સ નો મોહં મહાભૈરવઃ ॥ ૧॥

નીલરુચિ વેદકરવહ્નિ નયનં સત્
 શૂલકકપાલડમરું ચ સહપાશમ્ ।
નગ્નશુનવાહનસકિઙ્કિણિવિભૂષં
 પ્રોચ્ચગતિ કેશધરસર્પવરહારમ્ ॥ ૨॥

પશ્ચિમાભિમુખં રૌદ્રં ક્ષેત્રપાલં સમર્ચયેત્ ।
ભૈરવં ભૈરવીયુક્તં અન્યૈશ્ચ નિજકિઙ્કરૈઃ ॥ ૩॥

કલ્પવૃક્ષસ્ય મૂલે તુ રત્નમણ્ટપમધ્યમે ।
મણિસિંહાસનાસીનં નાનાભરણભૂષિતમ્ ॥ ૪॥

તરુણાદિત્યસઙ્કાશં રક્તમાલ્યામ્બરોજ્જ્વલમ્ ।
ઉદ્યત્પિઙ્ગજટાબદ્ધ ચારુચન્દ્રકલાધરમ્ ॥ ૫॥

કમલં સ્વર્ણપાત્રં ચ વરં ચાભયમેવ ચ ।
શઙ્ખં પીયૂષકુમ્ભં ચ બિભ્રાણં કરપઙ્કજૈઃ ॥ ૬॥

દેવ્યા ચમ્પકવર્ણાઙ્ગ્યા સમાલિઙ્ગિતવિગ્રહમ્ ।
સ્વપાદપદ્મભક્તાનાં વર્ષન્તં સ્વર્ણધારયા ॥ ૭॥

કરુણાસાગરં દેવં સ્વર્ણાકર્ષણભૈરવમ્ ।
સિદ્ધવિદ્યાધરૈર્નિત્યં સ્તૂયમાનં સમાશ્રયે ॥ ૮॥

સ્વર્ણપ્રદઃ સ્વર્ણવર્ષી સ્વર્ણાકર્ષણભૈરવઃ ।
ભક્તપ્રિયો ભક્તવશ્યો ભક્તાભીષ્ટફલપ્રદઃ ॥ ૯॥

સિદ્ધિદઃ કરુણામૂર્તિઃ પ્રણતાભીષ્ટપૂરકઃ ।
નિધિસિદ્ધિપ્રદઃ સ્વર્ણસિદ્ધિદો રસસિદ્ધિદઃ ॥ ૧૦॥

એતૈઃ પદૈઃ શુભૈર્દિવ્યૈર્યોઽર્ચયેત્સ્વર્ણભૈરવમ્ ।
સ્વર્ણસિદ્ધિમવાપ્નોતિ ભૈરવસ્ય પ્રસાદતઃ ॥ ૧૧॥

ગાઙ્ગેયપાત્રં ડમરું ત્રિશૂલં પાશં કરૈઃ સન્દધતં ત્રિણેત્રમ્ ।
દેવ્યા યુતં શ્વાનવરાશ્રિતં તં સ્વર્ણાભિધં ભૈરવમાશ્રયેઽહમ્ ॥ ૧૨॥

બ્રહ્મા યસ્ય મનોર્મુનિઃ નિગદિતસ્ત્રિષ્ટુપ્ ચ છન્દઃ સ્વયં
  સ્વર્ણાકર્ષણભૈરવો હરિહર બ્રહ્માત્મકો દેવતા ।
આં બીજં સહ શક્તિરિત્યભિહિતસ્તસ્યૈવ સૂત્રાત્મનઃ
  સ્તોત્રધ્યાનપુરસ્સરં મનુવરં વક્ષ્યામિ સમ્પ્રત્યહમ્ ॥ ૧૩॥

મન્દારદ્રુમમૂલભાજિ મહિતે માણિક્યસિંહાસને
  દિવ્યે રત્નમયે સુચમ્પકરુચા દેવ્યા સમાલિઙ્ગિતઃ ।
ભક્તેભ્યો વરરત્નપાત્રભરિતં સ્વર્ણં દધાનોઽનિશં
  સ્વર્ણાકર્ષણ ભૈરવો વિજયતે સ્વર્ગાપવર્ગૈકભૂઃ ॥ ૧૪॥

ૐ ઐં ક્લાં ક્લીં ક્લૂં ઇતિ વ્યાહરદ્ભ્યો
  ભિક્ષાં હૈમીં યઃ સ્વયં સમ્પ્રયચ્છન્ ।
કારુણ્યાબ્ધિઃ કલ્પમૂલાધિવાસઃ
  સ્વર્ણાકર્ષો ભૈરવો નોઽસ્તુ ભૂત્યૈ ॥ ૧૫॥

ૐ હ્રાં હ્રીં હ્રૂં ઇત્યન્વહં જાપકાનાં
  વર્ષન્તં દ્રાક્ સ્વર્ણવૃષ્ટિં સમગ્રામ્ ।
નિત્યં સ્વચ્છં સૂર્યકોટિપ્રકાશં
  સ્વર્ણાકર્ષં ભૈરવં ભાવયામિ ॥ ૧૬॥

મરકતમણિપાત્રે સમ્ભૃતં સ્વર્ણપૂરં
  સ્વમનુમનનકૃદ્ભ્યઃ સાદરં સમ્પ્રદાત્રે ।
કુરુ હૃદય સપર્યાં સેવ્યમાનાય નિત્યં
  સુરવરભુજગેન્દ્રૈરાપદુદ્ધારણાય ॥ ૧૭॥

નમોઽજામલબદ્ધાય કલ્પમૂલનિવાસિને ।
સ્વર્ણાકર્ષણશીલાય સાધકાનાં હિતાત્મને ॥ ૧૮॥

લોકેશ્વરાયામ્બુરુહાસનાદ્યૈઃ બર્હિર્મુખૈરર્ચિતપાદુકાય ।

દારિદ્ર્યનિર્મૂલનકર્મઠાય કારુણ્યવારાં નિધયે નમસ્તે ॥ ૧૯॥

દીનાનાથવિપન્નરક્ષણરતૈરાજ્ઞાપ્રતીક્ષાકરૈઃ
  સિદ્ધૈઃ સાધ્યનૃકિન્નરોરગસુરૈઃ નિત્યં પરીતાત્મને ।
સાનન્દાય સમુલ્લસદ્વરમણિપ્રદ્યોતતેજોજુષે
  સ્વર્ણાકર્ષણભૈરવાય સતતં કુર્મો નમસ્યાં વયમ્ ॥ ૨૦॥

સ્વર્ણાકર્ષિણ્યા સ્વદેવ્યાઽઽશ્રિતાય સ્વૈરારાવોદારસિંહાસનાય ।
કુર્મો નિત્યં શર્મદાત્રે નમસ્યાં મદ્દારિદ્ર્ય દ્વેષિણે ભૈરવાય ॥ ૨૧॥

સ્વર્ણપ્રદાનાધ્વરદીક્ષિતાય સ્વતેજસાક્રાન્તદિગન્તરાય ।
સૌભાગ્યસમ્પત્સદનાય નિત્યં શ્રીં હ્રીં મહાભૈરવ તે નમોઽસ્તુ ॥ ૨૨॥

ચિન્તામણિ સ્વજનકલ્પિતપારિજાત-
  મન્દાર વીતમણિમણ્ટપમધ્યગાય ।
સ્વર્ણપ્રદાનનિરતાય સદા સપર્યાં
  કુર્મો વયં ત્રિકરણૈર્વરભૈરવાય ॥ ૨૩॥

મૂલે કલ્પતરોઃ પ્રભામણિકૃતે ભદ્રાસને સંસ્થિતો
  હસ્તામ્ભોરુહ રત્નપાત્રભરિતૈઃ કાર્તસ્વરૈર્ભાસુરૈઃ ।
અર્થીન્ વિદ્રુતદુર્ગતીન્ વિરચયન્નુદ્યદ્દિનેશદ્યુતિઃ
  સ્વર્ણાકર્ષણ ભૈરવો ભવતુ મે દારિદ્ર્યવિદ્રાવકઃ ॥ ૨૪॥

કનક મણિવિરાજદ્ ભૂષણૈર્ભૂષિતાઙ્ગં
  સકલમુનિજનાનાં સ્વર્ણદાતારમીશમ્ ।
નિગમ શુનકવાહં ભૈરવં શૂલપાણિં
  વિપુલવરજટાલં સન્તતં ભાવયેઽહમ્ ॥ ૨૫॥

સ્વર્ણાકર્ષણ ભૈરવ મન્ત્રમયં સ્તોત્રમન્વહં જપતામ્ ।
નિધિસિદ્ધિરસસ્વર્ણસિદ્ધ્યશ્ચ ઝડિતિ જાયતે પુંસામ્ ॥ ૨૬॥

ઇતિ શ્રીવિજયાસારાવલીતાન્તર્ગતં સ્વર્ણાકર્ષણભૈરવસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Svarnakarshanabhairava Stotram*

pdf was typeset on October 27, 2025

Please send corrections to *sanskrit@cheerful.com*